# *राज्यस्तरीयशास्त्रीयस्पर्धा -2022-23*

## *नियमावली*

| *क्र.सं.* | *स्पर्धायाः नाम अध्येतव्यः ग्रन्थश्च* | *भागग्रहणाय अर्हता/स्पर्धाविवरणम्* | *पुरस्कारः* |
|---|---|---|---|
| ***1.*** | ***व्याकरणभाषणम्*** वैयाकरणसिद्धान्तमञ्जूषायां तिङर्थनिरूपणम् | ➢ संस्कृतविश्वविद्यालयेषु/ पारम्परिकसंस्कृतशिक्षणसंस्थासु आचार्य/ तत्समकक्षायाम् शास्त्रि/ तत्समकक्षायाः अन्तिमवर्षे कस्मिंश्चिदपि शास्त्रे अधीयानाः/ शिक्षाशास्त्रि/ शिक्षाचार्यकक्षायाम् अधीयानाः गुरुकुले अधीयानाः/ कस्यचिद्विदुषः सन्निधौ स्वाध्यायशीलाश्च छात्राः भागग्रहणय अर्हाः। (गुरुकुले अधीयानानां/ विद्वत्सन्निधौ स्वाध्यायरतानां वयोमितिः 01-01-2023 तमे दिनाङ्के 26 वर्षाणि अतीतानि न स्युः)<br><br>➢ प्रत्येकं विषये (शास्त्रे) भाषणस्पर्धायां प्रतिसंस्थं एकः एव स्पर्धालुः भागं ग्रहीतुमर्हति। एकः स्पर्धालुः एकस्मिन् एव शास्त्रे भाषणस्पर्धायां भागग्रहणाय अनुमन्यते।<br><br>➢ शलाकापरीक्षासु/ कण्ठपाठस्पर्धासु/ शास्त्रार्थविचारे यः भागं गृह्णाति सः अत्र भागग्रहणं नार्हति।<br><br>➢ भाषणार्थं निर्दिष्टं (वामतः स्तम्भे) तत्तच्छास्त्रसम्बद्धं/ विषयसम्बद्धं ग्रन्थं सम्यगधीत्य स्पर्धालुः उपस्थितः भवेत्। स्पर्धारम्भात् | • प्रथमस्थानभाजे राष्ट्रस्तरीयस्पर्धायां भागग्रहणाय अवसरः कल्प्यते।<br>• प्रथमद्वितीयतृतीयस्थानभाग्भ्यः प्रमाणपत्राणि।<br>• प्रमाणपत्राण्यतिरिच्य वस्तुरूपेण ग्रन्थरूपेण धनराशिरूपेण वा पुरस्काराः राज्यस्तरीयस्पर्धायोजकसंस्थाभिः उपलब्धानुदानराश्यनुसारेण प्रदीयन्ते। |
| ***2.*** | ***साहित्यभाषणम्*** ध्वन्यालोके प्रथमद्वितीयोद्योतौ | | |
| ***3.*** | ***न्यायभाषणम्*** गादाधरीयपञ्चलक्षण्यां पञ्चलक्षणानि | | |
| ***4.*** | ***साङ्ख्ययोगभाषणम्*** योगभाष्यस्य तृतीयपादः | | |
| ***5.*** | ***मीमांसाभाषणम्*** भाट्टदीपिकायां विशेषातिदेशः | | |
| ***6.*** | ***वेदान्तभाषणम्*** ब्रह्मसूत्रे चतुर्थोध्यायः (तत्तत्सिद्धान्तानुसारेण) | | |
| ***7.*** | ***धर्मशास्त्रभाषणम्*** मनुस्मृतौ नामाध्यायः | | |
| ***8.*** | ***ज्यौतिषभाषणम्*** बृहज्जातकम् (संपूर्णम्) | | |
| ***9.*** | ***जैन-बौद्धदर्शनभाषणम्*** न्यायबिन्दुः | | |
| ***10.*** | ***वेदभाष्यभाषणम्*** ऋग्वेदभाष्यभूमिका | | |
| ***11.*** | ***आयुर्वेदभाषणम्*** अष्टाङ्गहृदये सूत्रस्थाने आदिमाः पञ्च अध्यायाः | | |
| ***12.*** | ***भारतीयविज्ञानभाषणम्*** 1.भारतीयभौतिकविज्ञानम् 2.भारतीयरसायनविज्ञानम् 3.भारतीयवनस्पतिविज्ञानम् | | |

| | | | |
|---|---|---|---|
| | 4.भारतीयप्राणिविज्ञानम्<br>5.भारतीयकृषिविज्ञानम्<br>6.भारतीयान्तरिक्षविज्ञानम्<br>7.भारतीयपर्यावरणविज्ञानम्<br>8.भारतीयालयनिर्माणविधिः<br>9.भारतीयदण्डव्यवस्था<br>10.भारतीयस्वास्थ्यविज्ञानम्<br>11.भारतीयप्रबन्धनविधिः<br>12.भारतीयार्थशास्त्रम् | एकघण्टातः पूर्वं तेभ्यः ग्रन्थेभ्यः (भारतीयविज्ञानभाषणे निर्दिष्टविषयेभ्यः) प्रतिशास्त्रं कश्चन विषय-विशेषः भाषणीयविषयस्य शीर्षकत्वेन उद्घोष्यते ।<br><br>➢ भाषणाय षट्-निमेषात्मकः (5+1) कालः दीयते । (पञ्चनिमेषाणामन्ते सूचना दीयते । तदनन्तरम् एकनिमेषाभ्यन्तरे भाषणम् उपसंहरणीयम् ।)<br><br>➢ भाषणानन्तरं निर्णायकाः प्रश्नान् पृच्छेयुः । | |

| *क्र.सं.* | *स्पर्धायाः नाम अध्येतव्यः ग्रन्थश्च* | *भागग्रहणाय अर्हता/स्पर्धाविवरणम्* | *पुरस्कारः* |
|---|---|---|---|
| ***13.*** | ***व्याकरणशलाकापरीक्षा***<br>वैयाकरणभूषणसारस्य धात्वर्थलकारार्थप्रकरणे | संस्कृतविश्वविद्यालयेषु/ पारम्परिकसंस्कृतशिक्षणसंस्थासु आचार्य/ तत्समकक्षायाम् शास्त्रि/ तत्समकक्षायाः अन्तिमवर्षे कस्मिंश्चिदपि शास्त्रे अधीयानाः/ शिक्षाशास्त्रि/ शिक्षाचार्यकक्षायाम् अधीयानाः गुरुकुले अधीयानाः/ कस्यचिद्विदुषः सन्निधौ स्वाध्यायशीलाश्च छात्राः भागग्रहणय अर्हाः ।(गुरुकुले अधीयानानां/ विद्वत्सन्निधौ स्वाध्यायरतानां वयोमितिः 01-01-2023 तमे दिनाङ्के 26 वर्षाणि अतीतानि न स्युः)<br><br>➢ प्रत्येकं शास्त्रे शलाकापरीक्षायां एकस्याः संस्थायाः | ● प्रथमस्थानभाजे राष्ट्रस्तरीयस्पर्धायां भागग्रहणाय अवसरः कल्प्यते ।<br>● प्रथमद्वितीयतृतीयस्थानभाग्भ्यः प्रमाणपत्राणि ।<br>● प्रमाणपत्राण्यतिरिच्य वस्तुरूपेण ग्रन्थरूपेण धनराशिरूपेण वा पुरस्काराः राज्यस्तरीयस्पर्धायोजकसंस्थाभिः उपलब्धानुदानराश्यनुसारेण प्रदीयन्ते । |
| ***14.*** | ***साहित्यशलाकापरीक्षा***<br>साहित्यदर्पणे सप्तमपरिच्छेदतः ग्रन्थसमाप्तिपर्यन्तम् (7,8,9,10 परिच्छेदाः) | | |
| ***15.*** | ***न्यायशलाकापरीक्षा***<br>न्यायभाष्ये तृतीयोध्यायः | | |
| ***16.*** | ***मीमांसाशलाकापरीक्षा***<br>मीमांसाशाबरभाष्यस्य तृतीयाध्यये प्रथमद्वितीयपादौ | | |
| ***17.*** | ***वेदान्तशलाकापरीक्षा***<br>ब्रह्मसूत्रं प्रथमोध्यायः तत्तत्सिद्धान्तानुसारेण | | |

| | | | |
|---|---|---|---|
| | (विशिष्टाद्वैतवेदान्ते जिज्ञासाधिकरणं विहाय) | (प्रतिस्पर्धालुगणम्) एकस्यैव अवसरः प्रदीयते। | |
| ***18.*** | ***ज्यौतिषशलाकापरीक्षा***<br>सिद्धान्तशिरोमणौ पर्वसम्भवाधिकारतः पाताधिकारपर्यन्तम्<br>(प्रसङ्गे सति सूत्रं क्षेत्रं वा फलके विलिख्य व्याख्येयम्) | ➢ एकस्य छात्रस्य एकस्यां शलाकास्पर्धायाम् एव अवसरः कल्प्यते।<br><br>➢ भाषणस्पर्धासु/ कण्ठपाठस्पर्धासु/ शास्त्रार्थविचारे यः भागं गृह्णाति सः अत्र भागग्रहणं नार्हति। | |
| ***19.*** | ***पुराणेतिहासशलाकापरीक्षा***<br>श्रीमद्वाल्मीकिरामायणस्य सुन्दरकाण्डम् | ****शलाकापरीक्षायाः क्रमः अन्तिमपृष्ठे द्रष्टव्यः*** | |
| ***20.*** | ***भारतीयगणितशलाकापरीक्षा***<br><br>लीलावत्याम् आदितः श्रेढीव्यवहारपर्यन्तम्<br>(व्याख्यानावसरे यथाप्रसङ्गं गणितं फलके कृत्वा प्रदर्शनीयम् उपपत्तिश्चविवरणीया) | | |
| ***21.*** | ***अर्थशास्त्रशलाकापरीक्षा***<br>कामन्दकीयनीतिसारे आदिमाः त्रयःसर्गाः जममङ्गलव्याख्यासहिताः | | |
| ***22.*** | ***काव्यशलाकापरीक्षा***<br>रघुवंशे दशमसर्गतः चतुर्दशसर्गपर्यन्तम्<br>(मल्लीनाथीयादिव्याख्यासु स्थिताः विशेषाः उपस्थापनीयाः) | | |

| *क्र.सं.* | *स्पर्धायाः नाम अध्येतव्यः ग्रन्थश्च* | *भागग्रहणाय अर्हता/स्पर्धाविवरणम्* | *पुरस्कारः* |
|---|---|---|---|
| ***23*** | ***शास्त्रार्थविचारः***<br><br>1. कालनिरूपणम्<br>2. शाब्दबोधे मुख्यविशेष्यविचारः<br>3.धात्वर्थनिरूपणम्<br>4.अन्विताभिधानवादः<br>5. ख्यातिनिरूपणम् | ➢ संस्कृतविश्वविद्यालयेषु/ पारम्परिकसंस्कृतशिक्षणसंस्थासु विद्यावारिधौ, आचार्य/ तत्समकक्षायाम्, शास्त्रि/ तत्समकक्षायाः अन्तिमवर्षे कस्मिंश्चिदपि शास्त्रे अधीयानाः, शिक्षाशास्त्रि/शिक्षाचार्यकक्षायाम् अधीयानाःगुरुकुले अधीयानाः/ कस्यचिद्विदुषः सन्निधौ स्वाध्यायशीलाश्च छात्राः भागग्रहणय अर्हाः। (गुरुकुले अधीयानानां/ विद्वत्सन्निधौ स्वाध्यायरतानां वयोमितिः 01-01-2023 तमे दिनाङ्के 26 वर्षाणि अतीतानि न स्युः)<br><br>➢ अत्र वामतः स्तम्भे निर्दिष्टविषयेषु स्पर्धार्थिनः सम्यक् अध्ययनं कुर्युः। तदन्तर्गतं स्वाभीष्टशास्त्रांशगतं शीर्षकं निश्चित्य सूक्ष्मतया अनुसन्धानं कुर्युः। स्ववक्तव्यविषयस्य शास्त्रान्तरेण सम्बन्धं/साम्यं/भेदं पूर्वपक्षं, सिद्धान्तं च सम्यगवगच्छेयुः। तद्विषये परिचर्चार्थं सिद्धतां कुर्युः।<br><br>➢ प्रत्येकं राज्यात् राज्यस्तरे चितौ द्वौ एव छात्रौ अस्यां स्पर्धायां भागं ग्रहीतुमर्हतः। इयं स्पर्धा सोपानत्रयवती भवति। प्रथमे सोपाने चितं युगलषट्कं द्वितीयं सोपानं प्रति याति। तत्र युगलद्वयं चीयते।तस्य | • प्रथमस्थानभाजे युगलाय राष्ट्रस्तरीयस्पर्धायां भागग्रहणाय अवसरः कल्प्यते।<br>• प्रथमद्वितीयतृतीयस्थानभाग्भ्यःप्रमाणपत्राणि।<br>• प्रमाणपत्राण्यतिरिच्य वस्तुरूपेण ग्रन्थरूपेण धनराशिरूपेण वा पुरस्काराः राज्यस्तरीयस्पर्धायोजकसंस्थाभिः उपलब्धानुदानराश्यनुसारेण प्रदीयन्ते। |

| | | | |
|---|---|---|---|
| | | युगलद्वयस्य तृतीये सोपाने पुनः स्पर्धा भवति। तत्र युगलमेकं प्रथमस्थानं प्राप्नोति। अन्यत् च युगलं द्वितीयस्थानं प्राप्नोति। त्रिषु सोपानेषु अपि स्पर्धारम्भात् ***एकघण्टातः पूर्वं*** निर्दिष्टेभ्यः विषयेभ्यः कश्चन विषयविशेषः शास्त्रार्थविषयस्य शीर्षकत्वेन उद्घोष्यते।<br>➢ भाषणस्पर्धासु/कण्ठपाठस्पर्धासु/ शलाकापरीक्षासु यः भागं गृह्णाति सः अत्र भागग्रहणं नार्हति।<br><br>➢ युगलवाक्यार्थरूपेण इयं स्पर्धा भवति। प्रथमसोपाने प्रदत्तविषयाधारेण स्वाभीष्टशास्त्रनुसारं निश्चित-शीर्षकानुसारेण 15 निमेषात्मके काले विषयः प्रतिपादनीयः। द्वयोः मध्ये कश्चन पूर्वपक्षं कश्चन सिद्धान्तं च उपस्थापयेत्। प्रथमे सोपाने चितेन युगलषट्केन द्वितीयसोपाने पुनः निर्दिष्टशीर्षकानुसारेण 15 निमेषात्मके काले विषयः प्रतिपादनीयः।द्वितीये सोपाने चितेन युगलद्वयेन पुनः निर्दिष्टशीर्षकानुसारेण 30 निमेषात्मके काले विषयः प्रतिपादनीयः। षडाधिकयुगलाभावे आगतेषु सोपानत्रये स्पर्धा करणीया।<br>➢ स्पर्धिनः निर्णायकानुमतिं प्राप्य प्रश्नान् कुर्युः।<br><br>*शास्त्रार्थविचारस्य क्रमः अन्तिमपृष्ठे द्रष्टव्यः । | |

| क्र.सं. | स्पर्धायाः नाम अध्येतव्यः : ग्रन्थश्च | भागग्रहणाय अर्हता/स्पर्धाविवरणम् | पुरस्कारः |
|---|---|---|---|
| 24. | काव्यकण्ठपाठः किरातार्जुनीये आदितः पञ्चमसर्गपर्यन्तम् | ➢ राज्यस्तरीयस्पर्धायां चिताः संस्कृतविश्वविद्यालयेषु/ पारम्परिक संस्कृतशिक्षणसंस्थासु पू-मध्यमा/उ-मध्यमा/ प्राक्शास्त्रिकक्षायां शास्त्रिकक्षायां तत्समकक्षायाम् / गुरुकुले अधीयानाः /कस्यचिद्विदुषः सन्निधौ स्वाध्यायशीलाश्च छात्राः भागग्रहणयअर्हाः । (गुरुकुले विदुषः सन्निधौ च अधीयानानां वयोमितिः 01-01-2023 तमे दिनाङ्के 21 वर्षाणि अतीतानि न स्युः ।)<br><br>➢ प्रतिराज्यं/प्रति-स्पर्धालुगणम् एकस्य एव अवसरः ।<br><br>➢ भाषणस्पर्धासु शलाकापरीक्षासु शास्त्रार्थविचारे अन्यकण्ठपाठस्पर्धासु वा यः भागं गृह्णाति सः अत्र भागं ग्रहीतुं नार्हति ।<br><br>➢ निर्णायकाः निर्दिष्टग्रन्थभागे प्रत्येकं सर्गस्य विभिन्नस्थानेषु स्पर्धालोः परीक्षणं कुर्युः । निर्णायकैः उद्धृतात् स्थानात्, यावत्पर्यन्तं निर्णायकाः श्रोतुमिच्छन्ति तावत् पर्यन्तं स्पर्धालुना श्लोकाः श्रावणीयाः । | • प्रथमस्थानभाजे राष्ट्रस्तरीयस्पर्धायां भागग्रहणाय अवसरः कल्प्यते ।<br><br>• प्रथमद्वितीयतृतीयस्थानभाग्भ्यः प्रमाणपत्राणि ।<br><br>• प्रमाणपत्राण्यतिरिच्य वस्तुरूपेण ग्रन्थरूपेण धनराशिरूपेण वा पुरस्काराः राज्यस्तरीयस्पर्धायोजकसंस्थाभिः उपलब्धानुदानराश्यनुसारेण प्रदीयन्ते । |

| | | | |
|---|---|---|---|
| ***25.*** | ***अमरकोषकण्ठपाठः*** संपूर्णः अमरकोषः | ➢ संस्कृतविश्वविद्यालयेषु/ पारम्परिकसंस्कृतशिक्षणसंस्थासु पू- मध्यमा/ उ- मध्यमा/ प्राक्शास्त्रिकक्षायां/ शास्त्रिकक्षायां तत्समकक्षायाम्/ गुरुकुले अधीयानाः /कस्यचिद्विदुषः सन्निधौ स्वाध्यायशीलाश्च छात्राः भागग्रहणय अर्हाः। (गुरुकुले विदुषः सन्निधौ च अधीयानानां वयोमितिः 01-01-2023 तमे दिनाङ्के 21 वर्षाणि अतीतानि न स्युः।)<br><br>➢ प्रतिसंस्थं/प्रतिस्पर्धालुगणम् एकस्य एव अवसरः।<br><br>➢ भाषणस्पर्धासु शलाकापरीक्षासु शास्त्रार्थविचारे अन्यकण्ठपाठस्पर्धासु वा यः भागं गृह्णाति सः अत्र भागं ग्रहीतुं नार्हति।<br><br>➢ अस्यां स्पर्धायां सकृत् स्वर्णपदकेन पुरस्कृतः अनन्तरवर्षेषु पुनः अस्यां स्पर्धायां भागग्रहणाय नानुमन्यते।<br><br>➢ निर्णायकाः निर्दिष्टग्रन्थभागे प्रत्येकं काण्डस्य विभिन्नस्थानेषु स्पर्धालोः परीक्षणं कुर्युः। निर्णायकैः उद्धृतात् स्थानात्, यावत् पर्यन्तं निर्णायकाः श्रोतुमिच्छन्ति तावत् पर्यन्तं स्पर्धालुना श्लोकाः श्रावणीयाः। | ● प्रथमस्थानभाजे राष्ट्रस्तरीयस्पर्धायां भागग्रहणाय अवसरः कल्प्यते।<br>● प्रथमद्वितीयतृतीयस्थानभाग्भ्यः प्रमाणपत्राणि।<br>● प्रमाणपत्राण्यतिरिच्य वस्तुरूपेण ग्रन्थरूपेण धनराशिरूपेण वा पुरस्काराःराज्यस्तरीयस्पर्धायोजकसंस्थाभिः उपलब्धानुदानराश्यनुसारेण प्रदीयन्ते। |

| | | | |
|---|---|---|---|
| ***26.*** | ***अष्टाध्यायीकण्ठपाठः***<br>सम्पूर्णा अष्टाध्यायी | ➢ संस्कृतविश्वविद्यालयेषु/ पारम्परिकसंस्कृतशिक्षणसंस्थासु पू- मध्यमा/ उ- मध्यमा/ प्राक्शास्त्रिकक्षायां/ शास्त्रिकक्षायां तत्समकक्षायाम्/ गुरुकुले अधीयानाः /कस्यचिद्विदुषः सन्निधौ स्वाध्यायशीलाश्च छात्राः भागग्रहणय अर्हाः। (गुरुकुले विदुषः सन्निधौ च अधीयानानां वयोमितिः 01-01-2023 तमे दिनाङ्के 21 वर्षाणि अतीतानि न स्युः।)<br><br>➢ प्रतिसंस्थं/प्रति-स्पर्धालुगणम् एकस्य एव अवसरः।<br><br>➢ भाषणस्पर्धासु शलाकापरीक्षासु शास्त्रार्थविचारे अन्यकण्ठपाठस्पर्धासु वा यः भागं गृह्णाति सः अत्र भागं ग्रहीतुं नार्हति।<br><br>➢ अस्यां स्पर्धायां सकृत् स्वर्णपदकेन पुरस्कृतः अनन्तरवर्षेषु पुनः अस्यां स्पर्धायां भागग्रहणाय नानुमन्यते।<br><br>➢ निर्णायकाः निर्दिष्टग्रन्थभागे प्रत्येकम् अध्यायेषु विभिन्नस्थानेषु स्पर्धालोः परीक्षणं कुर्युः। निर्णायकैः उद्धृतात् स्थानात्, यावत् पर्यन्तं निर्णायकाः श्रोतुमिच्छन्ति तावत् पर्यन्तं स्पर्धालुना सूत्राणि श्रावणीयानि। | ● प्रथमस्थानभाजे राष्ट्रस्तरीयस्पर्धायां भागग्रहणाय अवसरः कल्प्यते।<br>● प्रथमद्वितीयतृतीयस्थानभाग्भ्यः प्रमाणपत्राणि।<br>प्रमाणपत्राण्यतिरिच्य वस्तुरूपेण ग्रन्थरूपेण धनराशिरूपेण वा पुरस्काराःराज्यस्तरीयस्पर्धायोजकसंस्थाभिः उपलब्धानुदानराश्यनुसारेण प्रदीयन्ते। |

<table>
<tr>
<td>*27.*</td>
<td>***धातुरूपकण्ठपाठः***<br>निर्दिष्टानां 100 धातूनां दशसु लकारेषु सर्वाणि कर्तरि, कर्मणि/भावे रूपाणि लटि ण्यन्त-सन्नन्तरूपाणि च ।</td>
<td>➢ संस्कृतविश्वविद्यालयेषु/ पारम्परिकसंस्कृतशिक्षणसंस्थासु पू- मध्यमा/उ- मध्यमा/ प्राक्शास्त्रिकक्षायां/ शास्त्रिकक्षायां तत्समकक्षायाम्/ गुरुकुले अधीयानाः /कस्यचिद्विदुषः सन्निधौ स्वाध्यायशीलाश्च छात्राः भागग्रहणय अर्हाः । (गुरुकुले विदुषः सन्निधौ च अधीयानानां वयोमितिः 01-01-2023 तमे दिनाङ्के 21 वर्षाणि अतीतानि न स्युः ।)<br><br>➢ प्रतिसंस्थं/प्रति-स्पर्धालुगणम् एकस्य एव अवसरः ।<br><br>➢ भाषणस्पर्धासु शलाकापरीक्षासु शास्त्रार्थविचारे अन्यकण्ठपाठस्पर्धासु वा यः भागं गृह्णाति सः अत्र भागं ग्रहीतुं नार्हति ।<br><br>➢ अस्यां स्पर्धायां सकृत् स्वर्णपदकेन पुरस्कृतः अनन्तरवर्षेषु पुनः अस्यां स्पर्धायां भागग्रहणाय नानुमन्यते ।<br><br>स्पर्धार्थं निर्दिष्टधातुषु निर्णायकैः पृष्टानां धातूनां लकाररूपाणि स्पर्धालुना वक्तव्यानि ।</td>
<td>● प्रथमस्थानभाजे राष्ट्रस्तरीयस्पर्धायां भागग्रहणाय अवसरः कल्प्यते ।<br>● प्रथमद्वितीयतृतीयस्थानभाग्भ्यः प्रमाणपत्राणि ।<br>● प्रमाणपत्राण्यतिरिच्य वस्तुरूपेण ग्रन्थरूपेण धनराशिरूपेण वा पुरस्काराःराज्यस्तरीयस्पर्धायोजकसंस्थाभिः उपलब्धानुदानराश्यनुसारेण प्रदीयन्ते ।</td>
</tr>
<tr>
<td colspan="4">***धातुरूपकण्ठपाठनिमित्तं निर्दिष्टाः धातवः***<br>● भू-सत्तायाम् 2. हसे-हसने, 3. पठ -व्यक्तायां वाचि 4. रक्ष-पालने, 5. वद- व्यक्तायां वाचि, 6. गम्लृ-गतौ, 7. दृशिर्- प्रेक्षणे, 8. पा-पालने, 9. ष्ठा-गतिनिवृत्तौ, 10. घ्रा-गन्धोपादाने, 11. षद्लृ-विशरणगत्यवसादनेषु, 12. डुपचष्- पाके, 13.णम-प्रह्वत्वे शब्दे च, 14. स्मृ- आध्याने, 15. जि-जये, 16. श्रु- श्रवणे, 17.कृष-विलेखने, 18.वस-निवासे, 19. त्यज-हानौ, 20. षेवृ-सेवने, 21.डुलभष्-प्राप्तौ, 22.वृधु-वृद्धौ, 23.मुद-हर्षे,</td>
</tr>
</table>

24.षह-मर्षणे, 25.वृतु-वर्तने, 26.ईक्ष-दर्शने, 27. णीञ्-प्रापणे, 28.हृञ्- हरणे, 29. टुयाचृ-याञ्चायाम्, 30.वह-प्रापणे,

- 31.अद-भक्षणे, 32. अस-भुवि, 33.इण्- गतौ, 34. रुदिर्-अश्रुविमोचने, 35. ञिष्वप्-शये, 36 दुह- प्रपूरणे, 37. लिह्-आस्वादने, 38. हन-हिंसागत्योः, 39. ष्टुञ्-स्तुतौ, 40. या- प्रापणे, 41. पा-रक्षणे, 42. शासु-अनुशिष्टौ, 43.विद- ज्ञाने,44.आस- उपवेशने, 45.शीङ्- स्वप्ने, 46. इङ्- अध्ययने, 47.ब्रूञ्- व्यक्तायां वाचि,
- 48.हु-दानादानयोः, 49.ञिभी- भये, 50. ह्री-लज्जायाम्, 51. डुभृञ्-धारणपोषणयोः 52.ओहाक्- त्यागे, 53.माङ्- माने शब्दे च, 54. डुदाञ्-दाने , 55. डुदाञ्-धारणपोषणयोः,
- 56.दिवु-क्रीडा.. कान्तिगतिषु, 57. नृती- गात्रविक्षेपे , 58 णश- अदर्शने, 59.भ्रमु-अनवस्थाने, 60. श्रमु-तपसि खेदे च, 61.षिवु-तन्तुसन्ताने, 62.षूङ्- प्राणिप्रसवे, 63.शो-तनूकरणे, 64.पद-गतौ,65.कुप-क्रोधे, 66.युध-संप्रहारे, 67.जनी-प्रादुर्भावे
- 68.चिञ्-चयने, 69.आप्लृ-व्याप्तौ, 70.शक्लृ-शक्तौ, 71.अशू-व्याप्तौ संघाते च,72.षुञ्- अभिषवे
- 73.तुद-व्यथने ,74.इष-इच्छायाम्, 75.लिख- अक्षरविन्यासे, 76.प्रच्छ-ज्ञीप्सायाम्, 77.स्पृश-संस्पर्शने, 78.कॄ-विक्षेपे, 79.गॄ- निगरणे,80. क्षिप- प्रेरणे, 81.मृङ्- प्राणत्यागे, 82.मुच्लृ- मोक्षणे
- 83.रुधिर्- आवरणे, 84.भिदिर्- विदारणे, 85.छिदिर्- द्वैधीकरणे, 86.हिसि-हिंसायाम्, 87.युजिर्-योगे, 88.भञ्जो- आमर्दने, 89. भुज-पालनाभ्यवहारयोः
- 90. तनु- विस्तारे, 91.डुकृञ्- करणे
- 92. डुक्रीञ्- द्रव्यविनिमये,93.ज्ञा- अवबोधने, 94. बन्ध- बन्धने,95.मन्थ- विलोडने, 96.ग्रह-उपादाने 97.चुर- स्तेये, 98.चिति- स्मृत्याम्, 99. भक्ष- अदने, 100. कथ-वाक्यप्रबन्धे

| *क्र.सं.* | *स्पर्धायाः नाम अध्येतव्यः ग्रन्थश्च* | *भागग्रहणाय अर्हता/स्पर्धाविवरणम्* | *पुरस्कारः* |
|---|---|---|---|
| ***28.*** | *भगवद्गीताकण्ठपाठः* संपूर्णा भगवद्गीता | ➢ संस्कृतविश्वविद्यालयेषु/ पारम्परिकसंस्कृतशिक्षणसंस्थासु पू-मध्यमा/ उ- मध्यमा/ प्राक्शास्त्रिकक्षायां/ शास्त्रिकक्षायां तत्समकक्षायाम्/ गुरुकुले अधीयानाः / कस्यचिद्विदुषः सन्निधौ स्वाध्यायशीलाश्च छात्राः भागग्रहणय अर्हाः। (गुरुकुले विदुषः सन्निधौ च अधीयानानां वयोमितिः 01-01-2023 तमे दिनाङ्के 21 वर्षाणि अतीतानि न स्युः।)<br><br>➢ प्रतिराज्यं/ प्रति-स्पर्धालुगणम् एकस्य एव अवसरः। | • प्रथमस्थानभाजे राष्ट्रस्तरीयस्पर्धायां भागग्रहणाय अवसरः कल्प्यते।<br>• प्रथमद्वितीयतृतीयस्थानभाग्भ्यः प्रमाणपत्राणि।<br>• प्रमाणपत्राण्यतिरिच्य वस्तुरूपेण ग्रन्थरूपेण धनराशिरूपेण वा पुरस्काराःराज्यस्तरीयस्पर्धायोजकसंस्थाभिः उपलब्धानुदानराश्यनुसारेण प्रदीयन्ते। |

| | | | |
|---|---|---|---|
| | | ➢ भाषणस्पर्धासु शलाकापरीक्षासु शास्त्रार्थविचारे अन्यकण्ठपाठस्पर्धासु वा यः भागं गृह्णाति सः अत्र भागं ग्रहीतुं नार्हति ।<br>➢ अस्यां स्पर्धायां सकृत् स्वर्णपदकेन पुरस्कृतः अनन्तरवर्षेषु पुनः अस्यां स्पर्धायां भागग्रहणाय नानुमन्यते ।<br>निर्णायकाः निर्दिष्टग्रन्थभागे प्रत्येकम् अध्यायेषु विभिन्नस्थानेषु स्पर्धालोः परीक्षणं कुर्युः । निर्णायकैः उद्धृतात् स्थानात्, यावत् पर्यन्तं निर्णायकाः श्रोतुमिच्छन्ति तावत् पर्यन्तं स्पर्धालुना श्लोकाः श्रावणीयाः । | |
| ***29.*** | ***सुभाषितकण्ठपाठः***<br>निर्दिष्टानि पञ्चाशताधिकैशतं सुभाषितानि | ➢ संस्कृतविश्वविद्यालयेषु/ पारम्परिकसंस्कृतशिक्षणसंस्थासु पू- मध्यमा/ उ- मध्यमा/ प्राक्शास्त्रिकक्षायां/ शास्त्रिकक्षायां तत्समकक्षायाम्/ गुरुकुले अधीयानाः /कस्यचिद्विदुषः सन्निधौ स्वाध्यायशीलाश्च छात्राः भागग्रहणय अर्हाः । (गुरुकुले विदुषः सन्निधौ च अधीयानानां वयोमितिः 01-01-2023 तमे दिनाङ्के 21 वर्षाणि अतीतानि न स्युः ।)<br>➢ प्रतिसंस्थं/ प्रति-स्पर्धालुगणम् एकस्य एव अवसरः ।<br>➢ भाषणस्पर्धासु शलाकापरीक्षासु शास्त्रर्थविचारे अन्यकण्ठपाठस्पर्धासु वा यः भागं गृह्णाति सः अत्र भागं ग्रहीतुं नार्हति ।<br>➢ अस्यां स्पर्धायां सकृत् स्वर्णपदकेन पुरस्कृतः अनन्तरवर्षेषु पुनः अस्यां स्पर्धायां भागग्रहणाय नानुमन्यते ।<br><br>निर्णायकाः निर्दिष्टग्रन्थभागे प्रत्येकम् सुभाषितेषु विभिन्नस्थानेषु स्पर्धालोः परीक्षणं कुर्युः । निर्णायकैः उद्धृतात् स्थानात्, यावत् पर्यन्तं निर्णायकाः | • प्रथमस्थानभाजे राष्ट्रस्तरीयस्पर्धायां भागग्रहणाय अवसरः कल्प्यते ।<br>• प्रथमद्वितीयतृतीयस्थानभाग्भ्यः प्रमाणपत्राणि ।<br>• प्रमाणपत्राण्यतिरिच्य वस्तुरूपेण ग्रन्थरूपेण धनराशिरूपेण वा पुरस्काराःराज्यस्तरीयस्पर्धायोजकसंस्थाभिः उपलब्धानुदानराश्यनुसारेण प्रदीयन्ते । |

<table>
<tr><td></td><td></td><td>श्रोतुमिच्छन्ति तावत् पर्यन्तं स्पर्धालुना श्लोकाः श्रावणीयाः ।<br>निर्दिष्टानां सूभाषितानां सूची अन्तिमपृष्ठे द्रष्टव्या</td><td></td></tr>
<tr><td>30.</td><td>समस्यापूर्तिः</td><td rowspan="2">➢ समस्यापूर्तौ, अक्षरश्लोकीस्पर्धायां च तदर्थमेव चितौ द्वौ (समस्यापूर्तौ एकः, अक्षरश्लोक्यामेकः) भागं ग्रहीतुमर्हतः। उपर्युक्तासु स्पर्धासु यादृशास्तरीयाः अर्हाः तत्तत्स्तरीयाः अत्रपि अर्हाः। तावुभौ अतिरिच्य प्रत्येकं राज्यात् आगतस्पर्धालुगणस्य अन्ये सर्वे सदस्याः अपि भागं ग्रहीतुमर्हन्ति। अर्थात् भाषणस्पर्धासु शलाकापरीक्षासु कण्ठपाठस्पर्धासु शास्त्रार्थविचारे स्फूर्तिस्पर्धायां वा ये भागं गृह्णन्ति ते अपि समस्यपूर्तौ अक्षरश्लोक्यां च भागं ग्रहीतुमर्हन्ति।<br>➢ समस्यापूर्तिनिमित्तं समस्यात्रयं स्पर्धास्थाने उद्घोष्यते। एकघण्टाकाले प्रत्येकं स्पर्धार्थिना न्यूनातिन्यूनं समस्याद्वयं पूरणीयम् (दत्तपङ्क्तिमुपयुज्य श्लोकरचना कर्तव्या)<br><br>➢ अक्षरश्लोक्याम् अधोनिर्दिष्टकविभिः विरचितेभ्यः ग्रन्थेभ्यः एव श्लोकाः स्वीकरणीयाः<br>1)कालिदासः 2)श्रीहर्षः 3) भारविः<br>4)माघः 5)भवभूतिः<br>6)शूद्रकः 7) विशाखदत्तः<br>8) भर्तृहरिः (सुभाषितत्रिशती)<br>9)श्रीशंकरभागवत्पादः(स्तोत्राणि)<br>10)पण्डितराजजगन्नाथः(पञ्चलहर्यः)<br>11) भोजराजः(चम्पूरामायणम्)<br>12) अनन्तभट्टः (चम्पूभारतम्)<br>13) त्रिविक्रमभट्टः (नलचम्पूः)</td><td>➢ प्रथमस्थानभाजे राष्ट्रस्तरीयस्पर्धायां भागग्रहणाय अवसरः कल्प्यते ।<br>➢ प्रथमद्वितीयतृतीयस्थानभाग्भ्यः प्रमाणपत्राणि ।<br>➢ प्रमाणपत्राण्यतिरिच्य वस्तुरूपेण ग्रन्थरूपेण धनराशिरूपेण वा पुरस्काराःराज्यस्तरीयस्पर्धायोजकसंस्थाभिः उपलब्धानुदानराश्यनुसारेण प्रदीयन्ते ।</td></tr>
<tr><td>31.</td><td>अक्षरश्लोकी</td><td>● प्रथमस्थानभाजे राष्ट्रस्तरीयस्पर्धायां भागग्रहणाय अवसरः कल्प्यते ।<br>● प्रथमद्वितीयतृतीयस्थानभाग्भ्यः प्रमाणपत्राणि ।<br>प्रमाणपत्राण्यतिरिच्य वस्तुरूपेण ग्रन्थरूपेण धनराशिरूपेण वा पुरस्काराःराज्यस्तरीयस्पर्धायोजकसंस्थाभिः उपलब्धानुदानराश्यनुसारेण प्रदीयन्ते ।</td></tr>
</table>

| | | | |
|---|---|---|---|
| | | 14) अश्वघोषः 15)भासः<br>➢ पूर्ववर्तिना स्पर्धालुना पठितस्य श्लोकस्य तृतीयपादगतं प्रथमाक्षरं गृहीत्वा स्वस्वपर्याये स्पर्धालुः श्लोकं पठेत्। यथा- 'कश्चित् कान्ता-------' इति मेघदूतश्लोके पठिते सति क्रमागतपर्यायः स्पर्धी यकारेणारभ्यमाणं श्लोकं पठेत्।<br>➢ स्पर्धां परिसमापयितुम् उपलब्धसमयं, स्पर्धायाः गतिं च वीक्ष्य स्पर्धारम्भानन्तरं क्रमेण नियमाः निर्णायकैः परिशोधयिष्यन्ते।<br>➢ कस्मिंश्चिद्वर्षे राष्ट्रस्तरीयायाम् अक्षरश्लोक्यां स्वर्णपदकेन पुरस्कृतः पुनः अस्याम् अक्षरश्लोक्यां भागग्रहणाय नानुमन्यते। | |
| ***32.*** | ***शास्त्रीयस्फूर्तिस्पर्धा*** | ➢ संस्कृतविश्वविद्यालयेषु/ पारम्परिकसंस्कृतशिक्षणसंस्थासु शास्त्रिकक्षायां/ आचार्यकक्षायां/ विद्यावारिधिकक्षायां/ तत्समकक्षायाम्/ गुरुकुले अधीयानाः/ कस्यचिद्विदुषः सन्निधौ स्वाध्यायशीलाः शिक्षाशास्त्रि/ शिक्षाचार्यकक्षायाम् अधीयानाश्च छात्राः भागग्रहणाय अर्हाः। (गुरुकुले अधीयानानां/ विद्वत्सन्निधौ स्वाध्यायरतानां वयोमितिः 01-01- | ● प्रथमस्थानभाजे राष्ट्रस्तरीयस्पर्धायां भागग्रहणाय अवसरः कल्प्यते।<br>● प्रथमद्वितीयतृतीयस्थानभाग्भ्यः प्रमाणपत्राणि।<br>● प्रमाणपत्राण्यतिरिच्य वस्तुरूपेण ग्रन्थरूपेण धनराशिरूपेण वा पुरस्काराःराज्यस्तरीयस्पर्धायोजकसंस्थाभिः उपलब्धानुदानराश्यनुसारेण प्रदीयन्ते। |

| | | | |
|---|---|---|---|
| | | 2023 तमे दिनाङ्के 26 वर्षाणि अतीतानि न स्युः । <br>➢ शास्त्रीयस्फूर्तिस्पार्धायां (Quiz) प्रतिराज्यं द्वयोः एकः गणः भागं ग्रहीतुमर्हति। एतद्गणसदस्यौ इतरस्पर्धासु भागग्रहीतारौ, एतदर्थमेव चितौ वा भवितुमर्हतः। केवलसंस्कृतसाहित्यसंबद्धाः विषयाः भवन्ति। वेदाः उपनिषदः पुराणानि शास्त्राणि काव्यानि इत्यादीनि | |

उपर्युक्तासु स्पर्धासु प्रत्येकं स्पर्धायाः निर्णयकाले प्रथम-द्वितीय- तृतीयस्थानेषु प्रत्येकं स्थाने यदि द्वयोः स्पर्धाल्वोः बहूनां वा समाङ्काः आयान्ति तर्हि तयोः स्पर्धाल्वोःतेषां स्पर्धालूनां समाङ्कभञ्जनाय पुनः स्पर्धा (आशुस्पर्धा) आयोज्यते।

आहत्य प्रत्येकं संस्थायाः/प्रत्येकं गुरुकुलस्य (प्रतिस्पर्धालुगणं) ***चतुस्त्रिंशत्*** स्पर्धालवः (भाषणेषु प्रतिविषयं एकैकः इति 12, शलाकासु प्रतिविषयम् एकैकः इति 10 कण्ठपाठस्पर्धासु एकैकः इति 06 समस्यापूर्तौ अक्षरश्लोक्यां च एकैकः शास्त्रार्थविचारे स्पूर्तिस्पर्धायां च द्वौ द्वौ इत्याहत्य 34 ) राज्यस्तरीयशास्त्रीयस्पर्धायां भागं ग्रहीतुमर्हन्ति।

राज्यस्तरीयस्पर्धासु चिताः राष्ट्रस्तरे अखिलभारतीयशास्त्रीयस्पर्धायाः नियमावल्यां दर्शितरीत्या अर्हतावन्तः एव राष्ट्रस्तरस्य अखिलभारतीयशास्त्रीयस्पर्धासु भागं ग्रहीतुमर्हन्ति।

***राज्यस्तरीयस्पर्धासु भागग्रहणाय नामङ्कनार्थं प्रक्रिया***

- उपरि निर्दिष्टासु राज्यस्तरीयस्पर्धासु भागग्रहणचिकीर्षवः तदर्थं स्वस्वसंस्थामाध्यमेन स्वगुरुकुलमाध्यमेन स्वगुरोः माध्यमेन वा निर्दिष्टप्रपत्रं प्रपूर्य राज्यस्तरीयस्पर्धायोजकसंस्थायै संप्रेष्य नामङ्कनं कुर्युः।

- राज्यस्तरीयस्पर्धा कस्य राज्यस्य कुत्र भविष्यति तदायोजकाः के इत्यादिविवरणम् अग्रिमेषु पृष्ठेषु अवलोकनीयम्।

## *शलाकापरीक्षा-विधानम्*

### *स्पर्धालोः (अध्येतुः) कर्तव्यम्*

शलाकास्पर्धायां भागग्रहणचिकीर्षुणा स्पर्धालुना निर्दिष्टशास्त्रस्य निर्दिष्ट-ग्रन्थभागस्य समग्रतया (न तु अंशतः) अध्ययनं कार्यम्। स्पर्धालुः (अध्येता) ग्रन्थस्य निर्दिष्टभागस्य सर्वाः पङ्क्तीः कण्ठस्थीकुर्यात्, ग्रन्थपङ्क्तीनां विशदं व्याख्यानं कर्तुं सामर्थ्यं सम्पादयेत्, निर्दिष्टे ग्रन्थभागे विद्यमानविषयेषु गहनशास्त्रचर्चां कर्तुमपि कौशलं सम्पादयेत्। एतदभ्यन्तरे, राज्यस्तरीयस्पर्धार्थं नामाङ्कनमपि समये कारणीयम् इति न विस्मरेत्।

### *परीक्षाविधानम्*

अखिलभारतीयायां, राज्यस्तरीयायां च शलाकापरीक्षायां निर्दिष्टग्रन्थम् अधीतवतः प्रत्येकं स्पर्धालोः परीक्षणं त्रिधा क्रियते।

1. स्मृतिबल/धारणाशक्ति-परीक्षणम्
2. ग्रन्थपङ्क्तेः व्याख्यानसामर्थ्यपरीक्षणम्
3. विशिष्टज्ञानपरीक्षणम्/शास्त्रचर्चा/गाढपरीक्षणम्

***प्रथमः घट्टः*** (स्मृतिबल/धारणाशक्ति-परीक्षणम्)

परीक्षकैः शलाकया उद्घृतात् स्थानात् एका ग्रन्थपङ्क्तिः उच्चार्यते। ततः आरभ्य छात्रेण अग्रिमपङ्क्तयः श्रावणीयाः (परीक्षकाः यावत् श्रोतुमिच्छन्ति तावत्पर्यन्तम्)परीक्षकेषु एकैकः अपि एकस्य छात्रस्य एतादृशपरीक्षणम् अन्यूनं त्रिवारं कुर्यात्। स्पर्धार्थिसंख्याम्, समयं च अनुसृत्य परीक्षकाः ततोधिकप्रश्नान् अपि कर्तुमर्हन्ति।परीक्षकैः असकृत् शलाकया एव प्रश्नस्थानानि उद्घाटनीयानि।

***द्वितीयः घट्टः*** (व्याख्यानसामर्थ्यपरीक्षणम्)

परीक्षकैः शलाकया उद्घाटितस्थानात् ग्रन्थपङ्क्तिरेका उच्चार्यते। तस्याः पङ्क्तेः विशदं व्याख्यानं छात्रः कुर्यात्। छात्रस्य एतादृशं परीक्षणं एकैकः अपि परीक्षकः अन्यूनं त्रिवारं कुर्यात्। परीक्षकैः प्रतिवारं शलाकया प्रश्नस्थानानि चेतव्यानि।

***तृतीयः घट्टः*** (विशेषावगतिपरीक्षणम्/गाढज्ञानपरीक्षणम्)

परीक्षकाः निर्धारितग्रन्थभागे विद्यमाने विषये गहनप्रश्नान् कुर्युः। छात्रेण सह शास्त्रचर्चां कुर्युः। छात्रेण प्रदत्तसमाधानमनुसृत्य पुनः प्रश्नान् अपि परीक्षकाः कर्तुमर्हन्ति येन छात्रस्य ग्रन्थावगतेः स्तरः निर्णीतः भवेत्। एकवारं कृत-प्रश्नपुनःप्रश्न-शास्त्रचर्चादीनां समाधानात् परं पुनः द्वितीयवारम् एवमेव प्रश्नपुनःप्रश्नचर्चादिकं भवेत्। अनया रीत्या तृतीयवारं, चतुर्थवारं/पञ्चमवारं च परीक्षकाः प्रश्नान् कुर्युः।त्रिष्वपि घट्टेषु स्पर्धालुना स्वीयं सामर्थ्यं प्रदर्शनीयम्। अन्यथा भागग्रहणम् अपूर्णं भवेत्। परीक्षायाम् उत्तीर्णानाम् एव पुरस्काराय प्रथम/द्वितीय/तृतीय-स्थाननिश्चयः क्रियते।

## *शास्त्रार्थविचारस्पर्धाविधानम्*

शास्त्रार्थविचारस्पर्धा युगलवाक्यार्थस्पर्धा वर्तते। भागग्रहणचिकीर्षुभिः स्पर्धालुभिः निर्दिष्टविषये शास्त्रार्थविचारः करणीयः। प्रदत्तविषये कश्चन पूर्वपक्षम् अन्यः सिद्धान्तपक्षं च  उपस्थापयेत्।  स्ववक्तव्यविषयस्य शास्त्रान्तरेण सम्बन्धं/साम्यं/भेदं पूर्वपक्षं, सिद्धान्तं च सम्यगवगच्छेयुः। तद्विषये परिचर्चार्थं सिद्धतां कुर्युः। स्पर्धारम्भात् एकघण्टातः पूर्वं सोपानत्रये अपि निर्दिष्टेभ्यः विषयेभ्यः कश्चन विषयविशेषः शास्त्रार्थविषयस्य शीर्षकत्वेन उद्घोष्यते।

अखिलभारतीयायां, राज्यस्तरीयायां च शास्त्रार्थविचारे निर्दिष्टविषयम् अधीतवतः प्रत्येकं स्पर्धालुयुगलस्य परीक्षणं सोपनत्रये  क्रियते -

### *प्रथमसोपानम्*

निर्दिष्टेषु विषयेषु कश्चन विषयः स्पर्धार्थं प्रदीयते। तद्विषयमादाय स्पर्धालुयुगलेन शास्त्रार्थः कर्तव्यः। निर्णायकाः विषयोपस्थापनकाले कदापि प्रश्नं कर्तुम् अर्हन्ति। निर्णायकाः स्पर्धाल्वोः विषयप्रतिपादनसामर्थ्यस्य  विषयज्ञानस्य च परीक्षणं कुर्युः। तत्र उत्तीर्णं युगलषट्कं द्वितीयसोपानं प्रति आर्हतां प्राप्नोति। अस्मिन् सोपाने प्रतियुगलं विषयोपस्थापनार्थं 15 निमेषाः प्रदीयन्ते।

### *द्वितीयसोपानम्*

अत्र पुनः प्रथमसोपाने प्रदत्तं विषयं विहाय निर्दिष्टेषु विषयेषु कश्चन विषयः शास्त्रचर्चार्थं प्रदीयते। तद्विषयमादाय युगलषट्केन शास्त्रार्थः कर्तव्यः । तत्रापि पुनः निर्णायकाः स्पर्धाल्वोः विषयप्रतिपादनसामर्थ्यस्य  विषयज्ञानस्य च परीक्षणं कुर्युः। निर्णायकाः विषयोपस्थापनकाले कदापि प्रश्नं कर्तुम् अर्हन्ति। तत्र उत्तीर्णं युगलद्वयं तृतीयसोपानं प्रति गच्छति। अस्मिन् सोपाने प्रतियुगलं विषयोपस्थापनार्थं 15 निमेषाः प्रदीयन्ते।

### *तृतीयसोपानम्*

अत्र पुनः प्रथमसोपाने द्वितीयसोपाने च प्रदत्तं विषयं विहाय निर्दिष्टेषु विषयेषु कश्चन विषयः शास्त्रचर्चार्थं प्रदीयते। तद्विषयमादाय युगलद्वयेन शास्त्रार्थः कर्तव्यः । तत्रापि पुनः निर्णायकाः स्पर्धाल्वोः विषयप्रतिपादनसामर्थ्यस्य विषयज्ञानस्य च परीक्षणं कुर्युः। निर्णायकाः विषयोपस्थापनकाले कदापि प्रश्नं कर्तुम् अर्हन्ति। तत्र युगलमेकं प्रथमस्थानं प्राप्नोति। अन्यत् च युगलं द्वितीयस्थानं प्राप्नोति । अस्मिन् सोपाने प्रतियुगलं विषयोपस्थापनार्थं 30 निमेषाः प्रदीयन्ते।

# निर्दिष्टानि सुभाषितानि

दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये ।
स्वानुभूत्येकमानाय नमः शान्ताय तेजसे ॥ १ ॥

यां चिन्तयामि सततं मयि सा विरक्ता
साप्यन्यमिच्छति जनं स जनोऽन्यसक्तः ।
अस्मत्कृते च परिशुष्यति काचिदन्या
धिक् तां च तं च मदनं च इमां च मां च ॥ २ ॥

अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः ।
ज्ञानलवदुर्विग्धं ब्रह्मापि नरं न रञ्जयति ॥ ३ ॥

प्रसह्य मणिमुद्धरेन्मकरवक्त्रदंष्ट्राङ्कुरा-
त्समुद्रमपि संतरेत्प्रचलदुर्मिमालाकुलम् ॥
भुजङ्गमपि कोपितं शिरसि पुष्पवद्धारये-
न्न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ ४ ॥

लभेत सिकतासु तैलमपि यत्नतः पीडयन्
पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः ।
कदाचिदपि पर्यटन्शशविषाणमासादयेन्
न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ ५ ॥

व्यालं बालमृणालतन्तुभिरसौ रोद्धुं समुज्जृम्भते
छेत्तुं वज्रमणिं शिरीषकुसुमप्रान्तेन सन्नह्यति ।
माधुर्यं मधुबिन्दुना रचयितुं क्षाराम्बुधेरीहते
नेतुं वाञ्छति यः खलान्पथि सतां सूक्तैः सुधास्यन्दिभिः ॥ ६ ॥

स्वायत्तमेकान्तगुणं विधात्रा
विनिर्मितं छादनमज्ञतायाः ।
विशेषतः सर्वविदां समाजे
विभूषणं मौनमपण्डितानाम् ॥ ७ ॥

यदा किञ्चिज्ज्ञोऽहं गज इव मदान्धः समभवम्
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः ।
यदा किञ्चित्किञ्चिद्बुधजनसकाशादवगतम्
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः ॥ ८ ॥

कृमिकुलचितं लालाक्लिन्नं विगन्धि जुगुप्सितं
निरूपमरसं प्रीत्या खादन्नरास्थि निरामिषम् ।
सुरपितमपि श्वा पार्श्वस्थं विलोक्य न शङ्कते
न हि गणयति क्षुद्रो जन्तुः परिग्रहफल्गुताम् ॥ ९ ॥

शिरः शार्वं स्वर्गात्पशुपतिशिरस्तः क्षितिधरं
महीध्रादुत्तुङ्गादवनिमवनेश्चापि जलधिम् ।
अधोऽधो गङ्गेयं पदमुपगता स्तोकमथवा
विवेकभ्रष्टानां भवति विनिपातः शतमुखः ॥ १० ॥

शक्यो वारयितुं जलेन हुतभुक्छत्रेण सूर्यातपो
नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गोगर्दभौ ।
व्याधिर्भेषजसङ्ग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम् ॥ ११ ॥

साहित्यसङ्गीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः ।
तृणं न खादन्नपि जीवमानः तद्भागधेयं परमं पशूनाम् ॥ १२ ॥

येषां न विद्या न तपो न दानं
ज्ञानं न शीलं न गुणो न धर्मः ।
ते मर्त्यलोके भुवि भारभूताः
मनुष्यरूपेण मृगाश्चरन्ति ॥ १३ ॥

वरं पर्वतदुर्गेषु भ्रान्तं वनचरैः सह ।
न मूर्खजनसम्पर्कः सुरेन्द्रभवनेष्वपि ॥ १४ ॥

शास्त्रोपस्कृतशब्दसुन्दरगिरः शिष्यप्रदेयागमा
विख्याताः कवयो वसन्ति विषये यस्य प्रभोर्निर्धनाः ।
तज्जाड्यं वसुधाधिपस्य कवयस्त्वर्थं विनापीश्वराः
कुत्स्याः स्युः कुपरीक्षका न मणयो यैरर्घतः पातिताः ॥ १५ ॥

हर्तुर्याति न गोचरं किमपि शं पुष्णाति यत् सर्वदा-
ऽप्यर्थिभ्यः प्रतिपाद्यमानमनिषं प्राप्नोति वृद्धिं पराम् ।
कल्पान्तेष्वपि न प्रयाति निधनं विद्याख्यमन्तर्धनं
येषां तान् प्रति मानमुज्झत नृपाः कस्तैः सह स्पर्धते ॥ १६ ॥

अधिगतपरमार्थान् पण्डितान् मावमंस्था-
स्तृणमिव लघु लक्ष्मीर्नैव तान् संरुणद्धि ।
अभिनवमदलेखाश्यामगण्डस्थलानां
न भवति बिषतन्तुर्वारणं वारणानाम् ॥ १७ ॥

अम्भोजिनीवनविहारविलासमेव
हंसस्य हन्ति नितरां कुपितो विधाता ।
न त्वस्य दुग्धजलभेदविधौ प्रसिद्धां
वैदग्ध्यकीर्तिमपहर्तुमसौ समर्थः ॥ १८ ॥

केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला
न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः ।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ॥ १९ ॥

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशस्सुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता
विद्या राजसु पूजिता न तु धनं विद्याविहीनः पशुः ॥ २० ॥

क्षान्तिश्चेत् कवचेन किं किमरिभिः क्रोधोऽस्ति चेद्देहिनां
ज्ञातिश्चेदनलेन किं यदि सुहृद् दिव्यौषधैः किं फलम् ।
किं सर्पैर्यदि दुर्जनाः किमु धनैर्विद्या न वन्द्या यदि
व्रीडा चेत्किमु भूषणैः सुकविता यद्यस्ति राज्येन किम् ॥ २१ ॥

दाक्षिण्यं स्वजने दया परजने शाठ्यं सदा दुर्जने
प्रीतिः साधुजने नयो नृपजने विद्वज्जने चार्जवम् ।
शौर्यं शत्रुजने क्षमा गुरुजने कान्ताजने धृष्टता
ये चैवं पुरुषाः कलासु कुशलास्तेष्वेव लोकस्थितिः ॥ २२ ॥

जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति ।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्सङ्गतिः कथय किं न करोति पुंसाम् ॥ २३ ॥

जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः ।
नास्ति येषां यशःकाये जरामरणजं भयम् ॥ २४ ॥

सूनुः सच्चरितः सती प्रियतमा स्वामी प्रसादोन्मुखः
स्निग्धं मित्रमवञ्चकः परिजनो निष्क्लेशलेशं मनः ।
आकारो रुचिरः स्थिरश्च विभवो विद्यावदातं मुखं
तुष्टे विष्टपकष्टहारिणि हरौ सम्प्राप्यते देहिना ॥ २५ ॥

प्राणाघातान्निवृत्तिः परधनहरणे संयमः सत्यवाक्यं
काले शक्त्या प्रदानं युवतिजनकथामूकभावः परेषाम् ।
तृष्णास्रोतोविभङ्गो गुरुषु च विनयः सर्वभूतानुकम्पा
सामान्यः सर्वशास्त्रेष्वनुपहतविधिः श्रेयसामेष पन्थाः ॥ २६ ॥

प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ॥
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमगुणा न परित्यजन्ति ॥ २७ ॥

असन्तो नाभ्यर्थ्याः सुहृदपि न याच्यः कृशधनः
प्रिया न्याय्या वृत्तिर्मलिनमसुभङ्गेऽप्यसुकरम् ।
विपद्युच्चैः स्थेयं पदमनुविधेयं च महतां
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥ २८ ॥

क्षुत्क्षामोऽपि जराकृशोऽपि शिथिलप्रायोऽपि कष्टां दशाम्
आपन्नोऽपि विपन्नदीधितिरपि प्राणेषु गच्छत्स्वपि ।
मत्तेभेन्द्रविभिन्नकुम्भकवलग्रासैकबद्धस्पृहः
किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केसरिः ॥ २९ ॥

स्वल्पस्नायुवसावशेषमलिनं निर्मांसमप्यस्थिकं
श्वा लब्ध्वा परितोषमेति न तु तत्तस्य क्षुधाशान्तये ।
सिंहो जम्बुकमङ्कमागतमपि त्यक्त्वा निहन्ति द्विपं
सर्वः कृच्छ्रगतोऽपि वाञ्छति जनः सत्वानुरुपं फलम् ॥ ३० ॥

लाङ्गुलचालनमधश्चरणावपातं
भूमौ निपत्य वदनोदरदर्शनं च ।
श्वा पिण्डदस्य कुरुते गजपुङ्गवस्तु
धीरं विलोकयति चाटुशतैश्च भुङ्क्ते ॥ ३१ ॥

परिवर्तिनि संसारे मृतः को वा न जायते ॥
स जातो येन जातेन याति वंशः समुन्नतिम् ॥ ३२ ॥

कुसुमस्तबकस्येव द्वयी वृत्तिर्मनस्विनः ।
मूर्ध्नि वा सर्वलोकस्य विशीर्येत वनेऽथवा ॥ ३३ ॥

सन्त्यन्येऽपि बृहस्पतिप्रभृतयः सम्भाविताः पञ्चषाः
तान् प्रत्येष विशेषविक्रमरुची राहुर्न वैरायते ।
द्वावेव ग्रसते दिवाकरनिशाप्राणेश्वरौ भास्वरौ
भ्रातः पर्वणि पश्य दानवपतिः शीर्षावशेषाकृतिः ॥ ३४ ॥

वहति भुवनश्रेणिं शेषः फणाफलस्थितां
कमठपतिना मध्ये पृष्ठं सदा च धार्यते ।
तमपि कुरुते क्रोधाधीनं पयोधिरनादरा-
दहह महतां निःसीमानश्चरित्रविभूतयः ॥ ३५ ॥

वरं पक्षच्छेदः समदमघवन्मुक्तकुलिश-
प्रहारैरुद्गच्छद्बहुलदहनोद्गारगुरुभिः ।
तुषाराद्रेः सूनोरहह पितरि क्लेशविवशे
न चासौ सम्पातः पयसि पयसां पत्युरुचितः ॥ ३६ ॥

यदचेतनोऽपि पादैः स्पृष्टः प्रज्वलति सवितुरिनकान्तः ।
तत्तेजस्वी पुरुषः परकृतनिकृतिं कथं सहते ॥ ३७ ॥

सिंहःशिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु ।
प्रकृतिरियं सत्ववतां न खलु वयसस्तेजसो हेतुः ॥ ३८ ॥

जातिर्यातु रसातलं गुणगणैस्तत्राप्यधो गम्यतां
शीलं शैलतटात्पतत्वभिजनः सन्दह्यतां वह्निना ।
शौर्ये वैरिणि वज्रमाशु निपतत्वर्थोऽस्तु नः केवलं
येनैकेन विना गुणास्तृणलवप्रायाः समस्ता इमे ॥ ३९ ॥

तानीन्द्रियाण्यविकलानि तदेव नाम
सा बुद्धिरप्रतिहता वचनं तदेव ।
अर्थोष्मणा विरहितः पुरुषः क्षणेन
सोऽप्यन्य एव भवतीति विचित्रमेतत् ॥ ४० ॥

यस्यास्ति वित्तं स नरः कुलीनः
स पण्डितः स श्रुतवान् गुणज्ञः ।
स एव वक्ता स च दर्शनीयः
सर्वे गुणाः काञ्चनमाश्रयन्ति ॥ ४१ ॥

दौर्मन्त्र्यान्नृपतिर्विनश्यति यतिः सङ्गात् सुतो लालनाद्
विप्रोऽनध्यनात् कुलं कुतनयाच्छीलं खलोपासनात् ।
ह्रीर्मद्यादनवेक्षणादपि कृषिः स्नेहः प्रवासाश्र-
यान्मैत्री चाप्रणयात् समृद्धिरनयात् त्यागः प्रमादाद्धनम् ॥ ४२ ॥

दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य ।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ॥ ४३ ॥

मणिः शोणाल्लीढः समरविजयी हेतिदलितो
मदक्षीबो नागः शरदि सरितः श्यानपुलिनाः ।
कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता
तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु नराः ॥ ४४ ॥

परिक्षीणः कश्चित्स्पृहयति यवानां प्रसृतये
स पश्चात् सम्पूर्णः कलयति धरित्रीं तृणसमाम् ।
अतश्चानैकान्त्याद्गुरुलघुतयाऽर्थेषु धनिना-
मवस्था वस्तूनि प्रथयति च सङ्कोचयति च ॥ ४५ ॥

राजन् दुधुक्षसि यदि क्षितिधेनुमेतां
तेनाद्य वत्समिव लोकममुं पुषाण ।
तस्मिंश्च सम्यगनिशं परिपोष्यमाणे
नानाफलैः फलति कल्पलतेव भूमिः ॥ ४६ ॥

सत्यानृता च परुषा प्रियवादिनी च
हिंस्रा दयालुरपि चार्थपरा वदान्या ।
नित्यव्यया प्रचुरनित्यधनागमा च
वाराङ्गनेव नृपनीतिरनेकरुपा ॥ ४७ ॥

आज्ञा कीर्तिः पालनं ब्राह्मणानां
दानं भोगः मित्रसंरक्षणं च ।
येषामेते षड्गुणा न प्रवृत्ताः
कोऽर्थस्तेषां पार्थिवोपाश्रयेण ॥ ४८ ॥

यद्धात्रा निजभालपट्टलिखितं स्तोकं महद्वा धनं
तत् प्राप्नोति मरुस्थलेऽपि नितरां मेरौ ततो नाधिकम् ।
तद्धीरो भव वित्तवत्सु कृपणां वृत्तिं वृथा मा कृथाः
कूपे पश्य पयोनिधावपि घटो गृह्णाति तुल्यं जलम् ॥ ४९ ॥

त्वमेव चातकाधार इति केषां न गोचरः ।
किमम्भोद वदास्माकं कार्पण्योक्तिं प्रतीक्षसे ॥ ५० ॥

रे रे चातक सावधानमनसा मित्र क्षणं श्रूयताम्
अम्भोदा बहवो वसन्ति गगने सर्वेऽपि नैतादृशाः ।
केचिद्वृष्टिभिरार्द्रयन्ति धरणीं गर्जन्ति केचिद्वृथा
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ॥ ५१ ॥

अकरुणत्वमकारणविग्रहः परधने परयोषिति च स्पृहा ।
सुजनबन्धुजनेष्वसहिष्णुता प्रकृतिसिद्धमिदं हि दुरात्मनाम् ॥ ५२ ॥

दुर्जनः परिहर्तव्यो विद्ययालङ्कृतोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥ ५३ ॥

जाड्यं ह्रीमति गण्यते व्रतरुचौ दम्भः शुचौ कैतवं
शूरे निर्घृणता मुनौ विमतिता दैन्यं प्रियालापिनि ।
तेजस्विन्यवलिप्तता मुखरता वक्तर्यशक्तिः स्थिरे
तत्को नाम गुणो भवेत्स गुणिनां यो दुर्जनैर्नाङ्कितः ॥५४ ॥

लोभश्चेदगुणेन किं पिशुनता यद्यस्ति किं पातकैः
सत्यं चेत्तपसा च किं शुचि मनो यद्यस्ति तीर्थेन किम् ।
सौजन्यं यदि किं गुणैः सुमहिमा यद्यस्ति किं मण्डनैः
सद्विद्या यदि किं धनैरपयशो यद्यस्ति किं मृत्युना ॥ ५५ ॥

शशी दिवसधूसरो गलितयौवना कामिनी
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः ।

प्रभुर्धनपरायणः सततदुर्गतः सज्जनो
नृपाङ्गणगतः खलो मनसि सप्त शल्यानि मे ॥ ५६ ॥

न कश्चिच्चण्डकोपानामात्मीयो नाम भूभुजाम् ।
होतारमपि जुह्वानं स्पृष्टो दहति पावकः ॥ ५७ ॥

मौनान्मूकः प्रवचनपटुर्वातुलो जल्पको वा
धृष्टः पार्श्वे वसति च सदा दूरतश्चाप्रगल्भः ।
क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥ ५८ ॥

उद्भासिताखिलखलस्य विशृङ्खलस्य
प्राग्जातविस्तृतनिजाधमकर्मवृत्तेः ।
दैवादवाप्तविभवस्य गुणद्विषोऽस्य
नीचस्य गोचरगतैः सुखमाप्यते कैः ॥ ५९ ॥

आरम्भगुर्वी क्षयिणी क्रमेण
लघ्वी पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्धपरार्धभिन्ना
छायेव मैत्री खलसज्जनानाम् ॥ ६० ॥

मृगमीनसज्जनानां तृणजलसन्तोषविहितवृत्तिनाम् ।
लुब्धकधीवरपिशुना निष्कारणवैरिणो जगति ॥ ६१ ॥

वाञ्छा सज्जनसङ्गमे परगुणे प्रीतिर्गुरौ नम्रता
विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादाद्भयम् ।
भक्तिः शूलिनि शक्तिरात्मदमने संसर्गमुक्तिः खले
येष्वेते निवसन्ति निर्मलगुणास्तेभ्यो नरेभ्यो नमः ॥ ६२ ॥

विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुचिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम् ॥ ६३ ॥

प्रदानं प्रच्छन्नं गृहमुपगते सम्भ्रमविधिः
प्रियं कृत्वा मौनं सदसि कथनं चाप्युपकृते ।
अनुत्सेको लक्ष्म्यामनभिभवगन्धाः परकथाः
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥ ६४ ॥

करे श्लाघ्यस्त्यागः शिरसि गुरुपादप्रणयिता
मुखे सत्या वाणी विजयिभुजयोर्वीर्यमतुलम् ।
हृदि स्वच्छा वृत्तिः श्रुतमधिगतं च श्रवणयो-
र्विनाप्यैश्वर्येण प्रकृतिमहतां मण्डनमिदम् ॥ ६५ ॥

सम्पत्सु महतां चित्तं भवत्युत्पलकोमलम् ।
आपत्सु च महाशैलशिलासङ्घातकर्कशम् ॥ ६६ ॥

सन्तप्तायसि संस्थितस्य पयसो नामापि न ज्ञायते
मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते ।
स्वात्यां सागरशुक्तिमध्यपतितं तन्मौक्तिकं जायते
प्रायेणाधममध्यमोत्तमगुणः संसर्गतो जायते ॥ ६७ ॥

प्रीणाति यः सुचरितः पितरं स पुत्रो
यद्भर्तुरेव हितमिच्छति तत् कलत्रम् ।
तन्मित्रमापदि सुखे च समक्रियं यद्
एतत् त्रयं जगति पुण्यकृतो लभन्ते ॥ ६८ ॥

एको देवः केशवो वा शिवो वा
ह्येकं मित्रं भूपतिर्वा यतिर्वा ।
एको वासः पत्तने वा वने वा
ह्येका भार्या सुन्दरी वा दरी वा ॥ ६९ ॥

नम्रत्वेनोन्नमन्तः परगुणकथनैः स्वान् गुणान् ख्यापयन्तः
स्वार्थान् सम्पादयन्तो विततपृथुतरारम्भयत्नाः परार्थे ।
क्षान्त्यैवाक्षेपरुक्षाक्षरमुखरमुखान् दुर्जनान् दूषयन्तः
सन्तः साश्चर्यचर्या जगति बहुमताः कस्य नाभ्यर्चनीयाः ॥ ७० ॥

भवन्ति नम्रास्तरवः फलोद्गमै-
नवाम्बुभिर्दूरविलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम् ॥ ७१ ॥

श्रोत्रं श्रुतेनैव न कुण्डलेन
दानेन पाणिर्न तु कङ्कणेन ।
विभाति कायः करुणापराणां
परोपकारैर्न तु चन्दनेन ॥ ७२ ॥

पापान्निवारयति योजयते हिताय
गुह्यं निगूहति गुणान् प्रकटीकरोति ।
आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं निगदन्ति सन्तः ॥ ७३ ॥

पद्माकरं दिनकरो विकचीकरोति
चन्द्रो विकासयति कैरवचक्रवालम् ।
नाभ्यर्थितो जलधरोऽपि जलं ददाति
सन्तः स्वयं परहिते विहिताभियोगाः ॥ ७४ ॥

एते सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यज्य ये
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये ।
तेऽमी मानवराक्षसाः परहितं स्वार्थाय विघ्नन्ति ये
ये विघ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥ ७५ ॥

क्षीरेणात्मगतोदकाय हि गुणा दत्ताः पुरा तेऽखिलाः
क्षीरोत्तापमवेक्ष्य तेन पयसा स्वात्मा कृशाणौ हुतः ।
गन्तुं पावकमुन्मनस्तदभवद् दृष्ट्वा तु मित्रापदं
युक्तं तेन जलेन शाम्यति सतां मैत्री पुनस्त्वीदृशी ॥ ७६ ॥

इतः स्वपिति केशवः कुलमितस्तदीयद्विषा-
मितश्च शरणार्थिनां शिखरिणां गणाः शेरते ।
इतोऽपि वडवानलः सह समस्तसंवर्तकै-
रहो विततमूर्जितं भारसहं च सिन्धोर्वपुः ॥ ७७ ॥

तृष्णां छिन्धि भज क्षमां जहि मदं पापे रतिं मा कृथाः
सत्यं ब्रूह्यनुयाहि साधुपदवीं सेवस्व विद्वज्जनान् ।
मान्यान् मानय विद्विषोऽप्यनुनय प्रख्यापय प्रश्रयं
कीर्तिं पालय दुःखिते कुरु दयामेतत् सतां चेष्टितम् ॥ ७८ ॥

मनसि वचसि काये पुण्यपीयूषपूर्णाः
त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः ।
परगुणपरमाणून् पर्वतीकृत्य नित्यं
निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ॥ ७९ ॥

किं तेन हेमगिरिणा रजताद्रिणा वा
यत्राश्रिताश्च तरवस्तरवन्त एव ।
मन्यामहे मलयमेव यदाश्रयेण
कङ्कोलनिम्बकुटजा अपि चन्दनाः स्युः ॥ ८० ॥

रत्नैर्महार्हैस्तुतुषुर्न देवा
न भेजिरे भीमविषेण भीतिम् ।
सुधां विना न प्रययुर्विरामं
न निश्चितार्थाद्विरमन्ति धीराः ॥ ८१ ॥

क्वचित् पृथ्वीशय्यः क्वचिदपि च पर्यङ्कशयनः
क्वचिच्छाकाहारः क्वचिदपि च शाल्योदनरुचिः ।
क्वचित् कण्ठाधारी क्वचिदपि च दिव्याम्बरधरो
मनस्वी कार्यार्थी न गणयति च दुःखं न च सुखम् ॥ ८२ ॥

ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो
ज्ञानस्योपशमः श्रुतस्य विनयो वित्तस्य पात्रे व्ययः ।

अक्रोधस्तपसः क्षमा प्रभवितुर्धर्मस्य निर्व्याजता
सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम् ॥ ८३ ॥

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु व यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ॥ ८४ ॥

पातितोऽपि कराघातैरुत्पतत्येव कन्दुकः ।
प्रायेण साधुवृत्तनामस्थायिन्यो विपत्तयः ॥ ८५ ॥

आलस्यं हि मनुष्याणां शरीरस्थो महारिपुः ।
नास्त्युद्यमसमो बन्धुः कुर्वाणो नावसीदति ॥ ८६ ॥

छिन्नोऽपि रोहति तरुश्चन्द्रः क्षीणोऽपि वर्धते लोके ।
इति विमृशन्तः सन्तः सन्तप्यन्ते न लोकेऽस्मिन् ॥ ८७ ॥

नेता यस्य बृहस्पतिः प्रहरणं वज्रं सुराः सैनिकाः
स्वर्गो दुर्गमनुग्रहः खलु हरेरैरावतो वारणः ।
इत्यैश्वर्यबलान्वितोऽपि बलभिद्भग्नः परैः सङ्गरे
तद्व्यक्तं ननु दैवमेव शरणं धिग्धिग्वृथा पौरुषम् ॥ ८८ ॥

भग्नाशस्य करण्डपिण्डिततनोर्म्लानेन्द्रियस्य क्षुधा
कृत्वाखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः ।
तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यातः पथा
लोकाः पश्यत दैवमेव हि नृणां वृद्धौ क्षये कारणम् ॥ ८९ ॥

कर्मायत्तं फलं पुंसां बुद्धिः कर्मानुसारिणी ।
तथापि सुधिया भाव्यं सुविचार्यैव कुर्वता ॥ ९० ॥

खल्वाटो दिवसेश्वरस्य किरणैः सन्तापितो मस्तके
वाञ्छन्देशमनातपं विधिवशात्तालस्य मूलं गतः ।

तत्रोच्चैर्महता फलेन पतता भग्नं सशब्दं शिरः
प्रायो गच्छति यत्र भाग्यरहितस्तत्रापदां भाजनम् ॥ ९१ ॥

रविनिशाकरयोर्ग्रहपीडनं गजभुजङ्गमयोरपि बन्धनम् ।
मतिमतां च विलोक्य दरिद्रतां विधिरहो बलवानिति मे मतिः ॥ ९२ ॥

सृजति तावदशेषगुणाकरं पुरुषरत्नमलङ्करणं भुवः ।
तदपि तत्क्षणभङ्गि करोति चेदहह कष्टमपण्डितता विधेः ॥ ९३ ॥

पत्रं नैव यदा करीरविटपे दोषो वसन्तस्य किं
नोलूकोऽप्यवलोकते यदि दिवा सूर्यस्य किं दूषणम् ।
धारा नैव पतन्ति चातकमुखे मेघस्य किं दूषणं
यत्पूर्वं विधिना ललाटलिखितं तन्मार्जितुं कः क्षमः ॥ ९४ ॥

नमस्यामो देवान्ननु हतविधेस्तेऽपि वशगा
विधिर्वन्द्यः सोऽपि प्रतिनियतकर्मैकफलदः ।
फलं कर्मायत्तं यदि किममरैः किञ्च विधिना
नमस्तत्कर्मभ्यो विधिरपि न येभ्यः प्रभवति ॥ ९५ ॥

ब्रह्मा येन कुलालवन्नियमितो ब्रह्माण्डभाण्डोदरे
विष्णुर्येन दशावतारगहने क्षिप्तो महासङ्कटे ।
रुद्रो येन कपालपाणिपुटके भिक्षाटनं कारितः
सूर्यो भ्राम्यति नित्यमेव गगने तस्मै नमः कर्मणे ॥ ९६ ॥

नैवाकृतिः फलति नैव कुलं न शीलं
विद्यापि नैव न च यत्नकृतापि सेवा ।
भाग्यानि पूर्वतपसा खलु सञ्चितानि
काले फलन्ति पुरुषस्य यथैव वृक्षाः ॥ ९७ ॥
वने रणे शत्रुजलाग्निमध्ये
महार्णवे पर्वतमस्तके वा ।
सुप्तं प्रमत्तं विषमस्थितं वा
रक्षन्ति पुण्यानि पुरा कृतानि ॥ ९८ ॥

या साधूंश्च खलान् करोति विदुषो मूर्खान् हितान् द्वेषिणः
प्रत्यक्षं कुरुते परोक्षममृतं हालाहलं तत्क्षणात् ।
तामाराधय सत्क्रियां भगवतीं भोक्तुं फलं वाञ्छितं
हे साधो व्यसनैर्गुणेषु विपुलेष्वास्थां वृथा मा कृथाः ॥ ९९ ॥

गुणवदगुणवद्वा कुर्वता कार्यजातं
परिणतिरवधार्या यत्नतः पण्डितेन ।
अतिरभसकृतानां कर्मणामाविपत्ते-
र्भवति हृदयदाही शल्यतुल्यो विपाकः ॥ १०० ॥

स्थाल्यां वैदूर्यमय्यां पचति तिलकणांश्चान्दनैरिन्धनौघैः
सौवर्णैर्लाङ्गलाग्रैर्विलिखति वसुधामर्कमूलस्य हेतोः ।
कृत्वा कर्पूरखण्डान् वृतिमिह कुरुते को द्रवाणां समन्तात्
प्राप्येमां कर्मभूमिं न चरति मनुजो यस्तपो मन्दभाग्यः ॥ १०१ ॥

मज्जत्वम्भसि यातु मेरुशिखरं शत्रून् जयत्वावहे
वाणिज्यं कृषिसेवने च सकला विद्याः कलाः शिक्षताम् ।
आकाशं विपुलं प्रयातु खगवत्कृत्वा प्रयत्नं परं
नाभाव्यं भवतीह कर्मवशतो भाव्यस्य नाशः कुतः ॥ १०२ ॥

भीमं वनं भवति तस्य पुरं प्रधानं
सर्वो जनः स्वजनतामुपयाति तस्य ।
कृत्स्ना च भूर्भवति सन्निधिरत्नपूर्णा
यस्यास्ति पूर्वसुकृतं विपुलं नरस्य ॥ १०३ ॥

को लाभो गुणिसङ्गमः किमसुखं प्राज्ञेतरैः सङ्गतिः
का हानिः समयच्युतिर्निपुणता का धर्मतत्त्वे रतिः ।
कः शूरो विजितेन्द्रियः प्रियतमा कानुव्रता किं धनं
विद्या किं सुखमप्रवासगमनं राज्यं किमाज्ञाफलम् ॥ १०४ ॥

अप्रियवचनदरिद्रैः प्रियवचनाढ्यैः स्वदारपरितुष्टैः ।
परपरिवादनिवृत्तैः क्वचित्क्वचिन्मण्डिता वसुधा ॥ १०५ ॥

कदर्थितस्यापि हि धैर्यवृत्तेर्न शक्यते धैर्यगुणः प्रमार्ष्टुम् ।
अधोमुखस्यापि कृतस्य वन्हेर्नाधः शिखा याति कदाचिदेव ॥ १०६ ॥

कान्ताकटाक्षविशिखा न लुनन्ति यस्य
चित्तं न निर्दहति कोपकृशानुतापः ।
कर्षन्ति भूरिविषयाश्च न लोभपाशै-
र्लोकत्रयं जयति कृत्स्नमिदं स धीरः ॥ १०७ ॥

एकेनापि हि शूरेण पादाक्रान्तं महीतलम् ।
क्रियते भास्करेणेव स्फारस्फुरिततेजसा ॥ १०८ ॥

वह्निस्तस्य जलायते जलनिधिः कुल्यायते तत्क्षणात्
मेरुः स्वल्पशिलायते मृगपतिः सद्यः कुरङ्गायते ।
व्यालो माल्यगुणायते विषरसः पीयूषवर्षायते
यस्याङ्गेऽखिललोकवल्लभतमं शीलं समुन्मीलति ॥ १०९ ॥

लज्जागुणौघजननीं जननीमिव स्वां
अत्यन्तशुद्धहृदयामनुवर्तमानाम् ।
तेजस्विनः सुखमसूनपि सन्त्यजन्ति
सत्यव्रतव्यसनिनो न पुनः प्रतिज्ञाम् ॥ ११० ॥

रत्नाकरः किं कुरुते स्वरत्नैर्विन्ध्याचलः किं करिभिः करोति ।
श्रीखण्डखण्डैर्मलयाचलः किं परोपकाराय सतां विभूतिः ॥ १११ ॥

कर्णावघातैरपि ताड्यमाना दूरीकृताः करिवरेण मदान्धबुध्या ।
तस्यैव गण्डयुगमण्डनहानिरेषा भृङ्गाः पुनर्विकचपद्मवने चरन्ति ॥११२ ॥

येनाकारि मृणालपत्रमशनं क्रीडा करिण्या सह
स्वच्छन्दं भ्रमणश्च कन्दरगणे पीतं पयो निर्झरम् ।
सोऽयं वन्यकरी नरेषु पतितः पुष्णाति देहं तृणै-
र्यद्दैवेन ललाटपत्रलिखितं तत् प्रोज्झितुं कः क्षमः ॥ ११३ ॥

व्योम्न्येकान्तविहारिणोऽपि विहगाः सम्प्राप्नुवन्त्यापदं
वध्यन्ते निपुणैरगाधसलिलान्मत्स्याः समुद्रादपि ।
दुर्नीते हि विधौ किमस्ति चरितं कः स्थानलाभे गुणः
कालो हि व्यसनप्रसावितकरो गृह्णाति दूरादपि ॥ ११४ ॥

अपि दलन्मुकुले बकुले यया पदमधायि कदापि न तृष्णया ।
अहह सा सहसा विधुरे विधौ मधुकरी बदरीमनुवर्तते ॥ ११५ ॥

सिंहक्षुण्णकरीन्द्रकुम्भगलितं रक्ताक्तमुक्ताफलं
कान्तारे बदरीधिया द्रुतमगात् भिल्लस्य पत्नी मुदा ।
पाणिभ्यामगुह्य शुक्लकठिनं तद्वीक्ष्य दूरे जहा-
वस्थाने पततामतीव महतामेतादृशी स्याद्गतिः ॥ ११६ ॥

किन्ते नम्रतया किमुन्नततया किन्ते घनच्छायया
किन्ते पल्लवलीलया किमनया चाशोक पुष्पश्रिया ।
यत्त्वन्मूलनिषण्णखिन्नपथिकस्तोमः स्तुवन्नन्वयं
न स्वादूनि मृदूनि खादति फलान्युत्कण्ठमुत्कण्ठितम् ॥ ११७ ॥

दूरे मार्गान्निवससि पुनः कण्टकैरावृतोऽसि
छायाशून्यः फलमपि च ते वानरैरप्यभक्ष्यम् ।
निर्गन्धस्त्वं मधुपरहितः शाल्मले सारशून्यः
सेवास्माकं भवति विफला तिष्ठ निश्वस्य यामः ॥ ११८ ॥

हंसाः पद्मवनाशया मधुलिहः सौरभ्यलाभाशया
पानथाः स्वादुफलाशया बलिभुजो गृध्राश्च मासाशया ।
दूरादुन्नतपुष्परागनिकरैर्निःसारमिथ्योन्नतैः
रे रे शाल्मलिपादप प्रतिदिनं केन त्वमावञ्चितः ॥ ११९ ॥

किन्तेन हेमगिरिणा रजताद्रिणा वा यत्र स्थिता हि तरवस्तरवस्त एव ।
वन्दामहे मलयमेव यदाश्रयेण शाकोटनिम्बकुटजान्यपि चन्दनानि ॥ १२० ॥

निर्वाणदीपे किमु तैलदानं चौरे गते वा किमु सावधानम् ।
वयोगते किं वनिताविलासः पयोगते किं खलु सेतुबन्धः ॥ १२१ ॥

शीतेऽतीते वसनमशनं वासरान्ते निशान्ते
क्रीडारम्भः कुवलयदृशां यौवनान्ते विवाहः ।
सेतोर्बन्धः पयसि गलिते प्रस्थिते लग्नचिन्ता
सर्वञ्चैतद्भवति विफलं स्वस्वकाले व्यतीते ॥ १२२ ॥

नवं वस्त्रं नवच्छत्रं नव्या स्त्री नूतनं गृहम् ।
सर्वञ्च नूतनं शस्तं सेवकान्ने पुरातने ॥ १२३ ॥

समायाति यदा लक्ष्मीर्नारिकेलफलाम्बुवत् ।
विनिर्याति यदा लक्ष्मीर्गजभुक्तकपित्थवत् ॥ १२४ ॥

अलसस्य कुतो विद्या अविद्यस्य कुतो धनम् ।
अधनस्य कुतो मित्रं अमित्रस्य कुतः सुखम् ॥ १२५ ॥

अब्धेः क्षारं जलं पीत्वा वर्षन्ति मधुरं भुविम् ।
परोपकारे निरताः कथं मेघा न सज्जनाः ॥ १२६ ॥
अपेक्षन्ते न च स्नेहं न पात्रं न दशान्तरम् ।
सदा लोकहिते युक्ता रत्नदीपा इवोत्तमाः ॥ १२७ ॥

अधमा धनमिच्छन्ति धनं मानं च मध्यमाः ।
उत्तमा मानमिच्छन्ति मानो हि महताम् धनम् ॥ १२८ ॥

अश्वं नैव गजं नैव व्याघ्रं नैव च नैव च ।
अजापुत्रं बलिं दद्यात् देवो दुर्बलघातकः ॥ १२९ ॥

अन्नदानं परं दानं विद्यादानमतः परम् ।
अन्नेन क्षणिका त्रुप्तिर्यावज्जीवं च विद्यया ॥ १३० ॥

अतिलोभात्कुबेरोऽपि दरिद्रो निश्चितं भवेत् ।
मितव्ययात् दरिद्रोऽपि निश्चितं धनवान् भवेत् ॥ १३१ ॥

अर्थागमो नित्यमरोगिता च प्रिया च भार्या प्रियवादिनी च ।
वश्यश्च पुत्रोऽर्थकारी च विद्या षड् जीवलोकस्य सुखानि राजन् ॥ १३२ ॥

अतितृष्णा न कर्तव्या तृष्णां नैव परित्यजेत् ।
शनैः शनैश्च भोक्तव्यं स्वयं वित्तमुपार्जितम् ॥ १३३ ॥

अविश्रामं वहेद्भारं शीतोष्णं न च विन्दति ।
ससन्तोषस्तथा नित्यं त्रीणि शिक्षेत गर्दभात् ॥ १३४ ॥

अतिपरिचयादवज्ञा सन्ततगमनादनादरो भवति ।
मलये भिल्लपुरन्ध्री चन्दनतरुकाष्ठमिन्धनं कुरुते ॥ १३५ ॥

अहो दुर्जनसंसर्गात् मानहानिः पदे पदे ।
पावको लोहसङ्गेन मुद्गरैरभिताड्यते ॥ १३६ ॥

अहो किमपि चित्राणि चरित्राणि महात्मनाम् ।
लक्ष्मीस्तृणाय मन्यन्ते तद्भरेण नमन्त्यपि ॥ १३७ ॥
अहं स्वर्णं न मे दुःखमग्निदाहे न ताडने ।
एतत्तु मे महादुःखं गुञ्जया तोलयन्ति माम् ॥ १३८ ॥

अर्थनाशं मनस्तापं गृहे दुश्चरितानि च ।
वञ्चनं चापमानं च मतिमान्न प्रकाशयेत् ॥ १३९ ॥

अर्थेन तु विहीनस्य पुरुषस्याल्पमेधसः ।
क्रियाः सर्वा विनश्यन्ति ग्रीष्मे कुसरितो यथा ॥ १४० ॥

अञ्जलिस्थानि पुष्पाणि वासयन्ति करद्वयं ।
अहो सुमनसां प्रीतिर्वामदक्षिणयोः समा ॥ १४१ ॥

अतिकुपिताऽपि सुजना योगेन मृदूभवन्ति न तु नीचाः ।
हेम्नः कठिनस्यापि द्रवणोपायोऽस्ति न तृणानाम् ॥ १४२ ॥

अस्यां सखे बधिरलोकनिवासभूमौ
किं कूजितेन किल कोकिल कोमलेन ।
एते हि दैवहतकास्तदभिन्नवर्णं
त्वां काकमेव कलयन्ति कलानभिज्ञाः ॥ १४३ ॥

आयुषः क्षण एकोऽपि सर्वरत्नैर्न लभ्यते ।
नीयते स वृथा येन प्रमादः सुमहानहो ॥ १४४ ॥

आपद्गतं हससि किं द्रविणान्ध मूढ
लक्ष्मीस्थिरा न भवतीति किमत्र चित्रम् ।
एतान् प्रपश्यसि घटां जलयन्त्रचक्रे
रिक्ता भवन्ति भरिता भरिताश्च रिक्ताः ॥ १४५ ॥

आत्मनः मुखदोषेण बध्यन्ते शुकसारिकाः ।
बकास्तत्र न बध्यन्ते मौनं सर्वार्थसाधनम् ॥ १४६ ॥

आदानस्य प्रदानस्य कर्तव्यस्य च कर्मणः ।
क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम् ॥ १४७ ॥

उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः ।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥ १४८ ॥

उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये ।
पयःपानं भुजङ्गानां केवलं विषवर्धनम् ॥ १४९ ॥

एकः स्वादु न भुञ्जीत नैकः सुप्तेषु जागृयात् ।
एको न गच्छेदध्वानं नैकश्चार्थान् विचिन्तयेत् ॥ १५० ॥